# हनुमान चालीसा संस्कृत

## दोहा

हृद्दर्पणं नीरजपादयोश्च गुरोः पवित्रं रजसेति कृत्वा ।
फलप्रदायी यदयं च सर्वम् रामस्य पूतञ्च यशो वदामि ॥

स्मरामि तुभ्यम् पवनस्य पुत्रम् बलेन रिक्तो मतिहीनदासः ।
दूरीकरोतु सकलं च दुःखम् विद्यां बलं बुद्धिमपि प्रयच्छ ॥

## चौपाई

जयतु हनुमद्देवो ज्ञानाब्धिश्च गुणागरः । जयतु वानरेशश्च त्रिषु लोकेषु कीर्तिमान् ॥ (१)
दूतः कोशलराजस्य शक्तिमांश्च न तत्समः । अञ्जना जननी यस्य देवो वायुः पिता स्वयम् ॥ (२)

हे वज्राङ्ग महावीर त्वमेव च सुविक्रमः । कुत्सितबुद्धिशत्रुस्त्वम् सुबुद्धेः प्रतिपालकः ॥ (३)
काञ्चनवर्णसंयुक्तः वासांसि शोभनानि च ।कर्णयोः कुण्डले शुभ्रे कुञ्चितानि कचानि च ॥ (४)

वज्रहस्ती महावीरः ध्वजायुक्तस्तथैव च ।स्कन्धे च शोभते यस्य मुञ्जोपवीतशोभनम् ॥ (५)
नेत्रत्रयस्य पुत्रस्त्वं केशरीनन्दनः खलु ।तेजस्वी त्वं यशस्ते च वन्द्यते पृथिवीतले ॥ (६)

विद्यावांश्च गुणागारः कुशलोऽपि कपीश्वरः ।रामस्य कार्यसिद्ध्यर्थम् उत्सुको सर्वदैव च ॥ (७)
राघवेन्द्रचरित्रस्य रसज्ञः सः प्रतापवान् ।वसन्ति हृदये तस्य सीता रामश्च लक्ष्मणः ॥ (८)

वैदेही सम्मुखे तेन प्रदर्शितस्तनुः लघुः ।लङ्का दग्धा कपीशेन विकटरूपधारिणा । (९)
हताः रूपेण भीमेन सकलाः रजनीचराः ।कार्याणि कोशलेन्द्रस्य सफलीकृतवान् कपिः ॥ (१०)

जीवितो लक्ष्मणस्तेन खल्वानीयौषधम् तथारामेण हर्षितो भूत्वा वेष्टितो हृदयेन सः ॥ (११)
प्राशंसत् मनसा रामः कपीशं बलपुङ्गवम् ।प्रियं समं मदर्थं त्वम् कैकेयीनन्दनेन च ॥ (१२)

यशो मुखैः सहस्रैश्च गीयते तव वानर ।हनुमन्तं परिष्वज्य प्रोक्तवान् रघुनन्दनः ॥ (१३)
सनकादिसमाः सर्वे देवाः ब्रह्मादयोऽपि च ।भारतीसहितः शेषो देवर्षिः नारदः खलु ॥ (१४)

कुबेरो यमराजश्च दिक्पालाः सकलाः स्वयम् ।पण्डिताः कवयः सर्वे शक्ताः न कीर्तिमण्डने ॥ (१५)
उपकृतश्च सुग्रीवो वायुपुत्रेण धीमता ।वानराणामधीपोऽभूद् रामस्य कृपया हि सः ॥ (१६)

तवैव चोपदेशेन दशवक्त्रसहोदरः ।प्राप्नोति नृपत्वं सः जानाति सकलं जगत् ॥ (१७)
योजनानां सहस्राणि दूरे भुवः स्थितो रविः ।सुमधुरं फलं मत्वा निगीर्णः भवता पुनः ॥ (१८)

मुद्रिकां कोशलेन्द्रस्य मुखे जग्राह वानरः । गतवानब्धिपारं सः नैतद् विस्मयकारकम् ॥ (१९)
यानि कानि च विश्वस्य कार्याणि दुष्कराणि हि । भवद्कृपाप्रसादेन सुकराणि पुनः खलु ॥ (२०)

Jay Shree Ram

# हनुमान चालीसा संस्कृत

द्वारे च कोशलेशस्य रक्षको वायुनन्दनः । तवानुज्ञां विना कोऽपि न प्रवेशितुमर्हति ॥ (२१)
लभन्ते शरणं प्राप्ताः सर्वाण्येव सुखानि च । भवति रक्षके लोके भयं मनाग् न जायते ॥ (२२)

समर्थो न च संसारे वेगं रोद्धुं बली खलु । कम्पन्ते च त्रयो लोकाः गर्जनेन तव प्रभो ॥ (२३)
श्रुत्वा नाम महावीरं वायुपुत्रस्य धीमतः ।भूतादयः पिशाचाश्च पलायन्ते हि दूरतः ॥ (२४)

हनुमन्तं कपीशं च ध्यायन्ति सततं हि ये ।नश्यन्ति व्याधयः तेषां पीडाः दूरीभवन्ति च ॥ (२५)
मनसा कर्मणा वाचा ध्यायन्ति हि ये जनाः ।दुःखानि च प्रणश्यन्ति हनुमन्तम् पुनः पुनः ॥ (२६)

नृपाणाञ्च नृपो रामः तपस्वी रघुनन्दनः । तेषामपि च कार्याणि सिद्धानि भवता खलु ॥ (२७)
कामान्यन्यानि च सर्वाणि कश्चिदपि करोति यः । प्राप्नोति फलमिष्टं सः जीवने नात्र संशयः॥ (२८)

कृतादिषु च सर्वेषु युगेषु सः प्रतापवान् । यशः कीर्तिश्च सर्वत्र दोदीप्यते महीतले ॥ (२९)
साधूनां खलु सन्तानां रक्षयिता कपीश्वरः । असुराणाञ्च संहर्ता रामस्य प्रियवानर ॥ (३०)

सिद्धिदो निधिदः त्वञ्च जनकनन्दिनी स्वयम् ।दत्तवती वरं तुभ्यं जननी विश्वरूपिणी ॥ (३१)
कराग्रे वायुपुत्रस्य चौषधिः रामरूपिणी ।रामस्य कोशलेशस्य पादारविन्दवन्दनात् ॥ (३२)

पूजया मारुतपुत्रस्य नरः प्राप्नोति राघवम् । जन्मनां कोटिसङ्ख्यानां दूरीभवन्ति पातकाः ॥ (३३)
देहान्ते च पुरं रामं भक्ताः हनुमतः सदा । प्राप्य जन्मनि सर्वे हरिभक्ताः पुनः पुनः ॥ (३४)

देवानामपि सर्वेषां संस्मरणं वृथा खलु । कपिश्रेष्ठस्य सेवा हि प्रददाति सुखं परम् ॥ (३५)
करोति सङ्कटं दूरं सङ्कटमोचनः कपिः । नाशयति च दुःखानि केवलं स्मरणं कपेः ॥ (३६)

जयतु वानरेशश्च जयतु हनुमद् प्रभुः । गुरुदेवकृपातुल्यम् करोतु मम मङ्गलम् ॥ (३७)
श्रद्धया येन केनापि शतवारं च पठ्यते । मुच्यते बन्धनाच्छीघ्रम् प्राप्नोति परमं सुखम् ॥ (३८)

स्तोत्रं तु रामदूतस्य चत्वारिंशच्च सङ्ख्यकम् । पठित्वा सिद्धिमाप्नोति साक्षी कामरिपुः स्वयम् ॥ (३९)
सर्वदा रघुनाथस्य तुलसी सेवकः परम् । (सर्वदा रघुनाथस्य रवीन्द्रः सेवकः परम्)
विज्ञायेति कपिश्रेष्ठ वासं मे हृदये कुरु ॥ (४०)

www.hanumanchalisas.net

## दोहा

**विघ्नोपनाशी पवनस्य पुत्रः कल्याणकारी हृदये कपीश ।**
**सौमित्रिणा राघवसीतया च सार्धं निवासं कुरु रामदूत ॥**

